# rAhustotraM

# રાહુસ્તોત્રમ્

## Document Information

Text title : rahustotram

File name : rahustotram.itx

Category : navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Description-comments : From Grantha/Tamil book Adityadi Navagraha Stotra

Latest update : June 28, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# રાહુસ્તોત્રમ્

અથ રાહુસ્તોત્રપ્રારમ્ભઃ ।
ૐ અસ્ય શ્રી રાહુસ્તોત્રમહામન્ત્રસ્ય વામદેવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । રાહુર્દેવતા ।
રાહુપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
કાશ્યપ ઉવાચ ।
શૃણ્વન્તુ મુનયઃ સર્વે રાહુપ્રીતિકરં સ્તવમ્ ।
સર્વરોગપ્રશમનં વિષભીતિહરં પરમ્ ॥ ૧॥

સર્વસમ્પત્કરં ચૈવ ગુહ્યમેતદનુત્તમમ્ ।
આદરેણ પ્રવક્ષ્યામિ શ્રૂયતામવધાનતઃ ॥ ૨॥

રાહુઃ સૂર્યરિપુશ્ચૈવ વિષજ્વાલી ભયાનનઃ ।
સુધાંશુવૈરિઃ શ્યામાત્મા વિષ્ણુચક્રાહિતો બલી ॥ ૩॥

ભુજગેશસ્તીક્ષ્ણદંષ્ટ્રઃ ક્રૂરકર્મા ગ્રહાધિપઃ ।
દ્વાદશૈતાનિ નામાનિ નિત્યં યો નિયતઃ પઠેત્ ॥ ૪॥

જપ્ત્વા તુ પ્રતિમાં રંયાં સીસજાં માષસુસ્થિતામ્ ।
નીલૈર્ગન્ધાક્ષતૈઃ પુષ્પૈઃ ભક્ત્યા સમ્પૂજ્ય યત્નતઃ ॥ ૫॥

વિધિના વહ્નિમાદાય દૂર્વાન્નાજ્યાહુતીઃ ક્રમાત્।
તન્મન્ત્રેણૈવ જુહુયાદ્યાવદષ્ટોત્તરં શતમ્ ॥ ૬॥

હુત્વૈવં ભક્તિમાન્ રાહું પ્રાર્થયેદ્ગ્રહનાયકમ્ ।
સર્વાપદ્વિનિવૃત્ત્યર્થં પ્રાઞ્જલિઃ પ્રણતો નરઃ ॥ ૭ રાહો કરાળવદન રવિચન્દ્રભયઙ્કર ।
તમોરૂપ નમસ્તુભ્યં પ્રસાદં કુરુ સર્વદા ॥ ૮॥

સિમ્હિકાસુત સૂર્યારે સિદ્ધગન્ધર્વપૂજિત ।
સિંહવાહ નમસ્તુભ્યં સર્વાન્રોગાન્ નિવારય ॥ ૯॥

કૃપાણફલકાહસ્ત ત્રિશૂલિન્ વરદાયક ।

ગરળાતિગરાળાસ્ય ગદાન્મે નાશયાખિલાન્ ॥ ૧૦॥

સ્વર્ભાનો સર્પવદન સુધાકરવિમર્દન ।
સુરાસુરવરસ્તુત્ય સર્વદા ત્વં પ્રસીદ મે ॥ ૧૧॥

ઇતિ સમ્પ્રાર્થિતો રાહુઃ દુષ્ટસ્થાનગતોઽપિ વા ।
સુપ્રીતો જાયતે તસ્ય સર્વાન્ રોગાન્ વિનાશયેત્ ॥ ૧૨॥

વિષાન્ન જાયતે ભીતિઃ મહારોગસ્ય કા કથા ।
સર્વાન્ કામાનવાપ્નોતિ નષ્ટં રાજ્યમવાપ્નુયાત્ ॥ ૧૩॥

એવં પઠેદનુદિનં સ્તવરાજમેતં મર્ત્યઃ પ્રસન્ન હૃદયો વિજિતેન્દ્રિયો યઃ ।
આરોગ્યમાયુરતુલં લભતે સુપુત્રાન્સર્વે ગ્રહા વિષમગાઃ સુરતિપ્રસન્નાઃ ॥ ૧૪॥

ઇતિ રાહુસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*rAhustotraM*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*